# Shri Mahakalabhairava Sahasranama Stotram

# श्रीमहाकालभैरवसहस्रनामस्तोत्रम्

## Document Information

Text title : Shri Mahakala Sahasranama Stotram 3

File name : mahAkAlasahasranAmastotram3.itx

Category : shiva, sahasranAma

Location : doc_shiva

Proofread by : Ruma Dewan

Description-comments : shivAgamakalpa

Latest update : May 23, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2023

*sanskritdocuments.org*

# श्रीमहाकालभैरवसहस्रनामस्तोत्रम्

श्री देव्युवाच -
यद्गुह्यं भगवन् व्याप्तं त्रिषुलोकेषु दुर्लभम् ।
कोटि ग्रन्थेषु गोप्यत्वात् सूचितं न प्रकाशितम् ॥ १॥

सर्वसम्पत्प्रदं देव सर्वापत्क्षयकारकम् ।
तदहं श्रोतुमिच्छामि भैरवस्य महात्मनः ॥ २॥

नाम्नां सहस्रं दिव्यानां सारतः सारयुद्धतम् ।
कृपया यद भूतेश यद्यहं प्राणवल्लभाः ॥ ३॥

श्री शिव उवाच -
सूचितमेत्वयि स्नेहात् न प्रकाश्यं कुलेश्वरी ।
नाम्नां सहस्रकोटीनां मध्यात् सारसमुद्धतम् ॥ ४॥

न वक्तव्यं मया देवि चित्तस्थं मम सर्वदा ।
अपकाश्य मतो देवि प्राणेभ्योऽपि वरं प्रियम् ॥ ५॥

श्री दुर्वासा उवाच -
इत्युक्तो भगवान् प्रीतो दध्यौ स्वात्मानमात्मना ।
पुलकाङ्कित सर्वाङ्गे च किञ्चदुवावह ॥ ६॥

श्री पार्वत्युवाच -
देव देव महादेव भक्तानुग्रहकारक ।
नाम्नां सहस्रं दिव्यानां महाकालस्य मे वद ॥ ७॥

गोप्यं तु सर्वागोयानां वदमे परमेश्वर ।
अप्रकाश्य कुलेशान यद्यहं प्राणवल्लभाः ॥ ८॥

श्रीमहाकालभैरवसहस्रनामस्तोत्रं
(अथ “भैरव तन्त्र” में वर्णित श्रीमहाकाल भैरव
सहस्रनामस्तोत्र का वर्णन किया जाता है । इस स्तोत्र का पाठ करने

में किसी विशेष प्रकार के पूजन अथवा न्यास की आवश्यकता नहीं है ।
केवल पाठ मात्र से ही यह स्तोत्र अभीप्सित फल को देने वाला कहा गया है ।)
ईश्वर उवाच -
देवेशि भक्त सुलभे देवनायक वन्दिते ।
भक्तानां कार्यसिद्धस्य निदानं ब्रूहीतत्त्वतः ॥ १॥

विनैव न्यास जालेन पूजनेन विना भवेत् ।
विना कायादि क्लेशेन वित्तव्ययं मिनेश्वरि ॥ २॥

देव्युवाच
ॐ अस्य श्री महाकालभैरवसहस्रनामस्तोत्रमन्त्रस्य
ब्रह्मानन्द भैरव ऋषिः, त्रिष्टुप् छन्दः, महाकालभैरवो
देवता, बं बीजम्, ह्रीं शक्तिः सर्वाभीष्टजा सिद्धये जपे विनियोगः ।
सहस्रनामानि ।
ॐ ह्रीं महाकालः कामदोनाथोऽनाथ प्रिय प्रभाकारः ।
भैरवो भीतिहा दर्पः कन्दर्पो मीन केतनः ॥ १॥

श्री शिव उवाच -
शृणुदेवि महागुह्यं रहस्यं परमाद्भुतम् ।
न कस्य चिन्मयारव्यातमद्यापि प्राणवल्लभे ॥ ९॥

सुखसम्पतप्रदे देवि धन धान्य जय प्रदम् ।
भूतग्रह विशानां स्मरणादेव नाशनम् ॥ १०॥

कृत्याद्रोहादि शमनं बालग्रह निवारणम् ।
चतुर्वर्ग चतुर्भद्र प्रदमेतं न संशयः ॥ ११॥

महाकालस्य नामानि प्रयुतान्यर्बुदानि च ।
सारात् सारतरं तेषां सहस्रं शृणु पत्नतः ॥ १२॥

सुधासिन्धु मणि द्वीपे पारिजात वनावृते ।
प्रज्वलपितृ भूमध्ये प्रोतहृत्सुप्तमीश्वरम् ॥ १३॥

विपरीतरता शक्तं दक्षिणा विलसद्युतिम् ।
चतुर्बाहुं त्रिनयनमज्जनाद्रि समप्रभम् ॥ १४॥

जटाजूटधरं देव शशाङ्ककृत शेखरम् ।
भुजङ्गमेखलायुक्तं दिग्वाससमनाकुलम् ॥ १५॥

डमरुं च कपालं च वरं शूलं  क्रमात्  करैः ।
दधतं विकटैन्दन्त करालवदनं विभुम् ॥ १६ ॥

ध्यात्वैवं साधक श्रेष्ठो जपन्सिद्धिं समश्नुते ॥ १७॥

श्री दुर्वासा उवाच -
नाम्नां सहस्रं दिव्यानां भैरवस्य महाकृतेः ।
वक्ष्यामि तत्त्वतः सम्यक्सर्वोपद्रवनाशनम् ॥ १८॥

सर्वपापहरं पुण्यं साधकानां सुखप्रदम् ।
आयुः पुष्टिः श्रीकरं च पुत्रपौत्रविवर्धनम् ॥ १९॥

भैरवस्तोत्रमन्त्रस्य महादेवो ऋषिस्मृतः ।
महाकालो भैरवश्च देवता परिकीर्तिताः ॥ २०॥

छन्दोऽनुष्टुप्सर्वकार्य सिद्ध्यर्थं साधकस्य तु ।
महाकालस्य तुष्ट्यर्थे विनियोगः प्रकीर्तितः ॥ २१॥

महादेवेन यत् प्रोक्तं पार्वत्यै सर्वमङ्गलम् ।
तच्छृणुष्वोपमन्यो मे कीर्त्यमानं सुमङ्गलम् ॥ २२॥

अथ माहात्म्यं -
सर्वशत्रुक्षयकरं सर्वापद्विनिवारणम् ।
सर्ववेदागमानां च सारात्सार समुद्धृतम् ॥ २३॥

देवदेवेन यत्प्रोक्तं हिमाचलसुतां प्रति ।
अत्याग्रहाति हीनाङ्गीं करुण्यात्प्रीत चेतसा ॥ २४॥

तदेवते प्रवक्ष्यामि गुरुभक्ताय साम्प्रतम् ।
अतियत्नान् मयाप्राप्तं दक्षिणा क्रमयोगतः ॥ २५॥

तत्तेऽहं सम्प्रवक्ष्यामि यच्छ्रुतं परमाद्भूतम् ।
कुलीनाय च शान्ताय भक्ताय भजुबुद्धये ॥ २६॥

धनप्राण प्रदात्रे च देवार्चातिरताय च ।
देवताभाव युक्ताय धर्मश्रद्धापराय च ॥ २७॥

वदान्यायातियोग्याय प्रवीणाय दयालवे ।
गोश्वेप्रदेयमाज्ञप्तमिति देव्यापुराधम ॥ २८॥

अतस्तुभ्यं प्रवक्ष्यामि करुणाब्धेर्महात्मनः ।

महाकालस्य देवस्य मदोन्मत्तस्य शूलिनः ॥ २९॥

स्तोत्रं सहस्रनामाख्यं सहस्रगुण सम्पतम् ।
तस्यस्मरणमात्रेण श्रवणेन प्रयत्नत ॥ ३०॥

पठनात्पाठनाद्वाऽपि सर्वश्रेयस्करं परम् ।
यत्र स्थितमिदं स्तोत्रं तत्र श्रीः सर्वतोमुखी ॥ ३१॥

तत्र सर्वत्र विजयो भक्त्येव न संशयः ।
तत्र लोको वशेत्सर्वः सवासो भैरवस्यतु ॥ ३२॥

उपमन्यो बहुक्ते किं न वाच्यं यस्यकस्यचित् ।
गुरुसन्तोष्य यत्नेन पठितव्यं समाहितः ॥ ३३॥

ऐं ह्रीं क्लीं महाकालस्य ह्रीं ह्रीं फट् फट् फट् हूँ नमः स्वाहा ॥ ३४॥

अथ श्रीमहाकालभैरवसहस्रनामस्तोत्रम् ।
ॐ महाकालो महादेवो महाकायो महातपः ।
मत्तो महेश्वरो मौनी महादेवो महाप्रियः ॥ १॥

महायोगी महाकर्मा महाभूतो मृदोयमः ।
मायी मनोमयो मान्यो महानीतिर्महागतिः ॥ २॥

मरुन्महर्षिमध्यस्थो महाव्याधो महाद्युतिः ॥ ३॥ (मरुन्महर्षियद्यस्थो)

महामतिर्महाभूतिर्महानीतिर्महाश्रयः ॥ ४॥

महान्महात्मा मूर्द्धन्यो मुनीन्द्रो मघवापतिः ।
मार्गह्यो मार्गगो मार्गी मृगव्याधो मृगप्रियः ॥ ५॥

मृताधारो महामूर्ति महामायो महोत्कटः ।
महारुद्रो महागर्तो महानीतिर्महामतिः ॥ ६॥

मदो मोदो महामोदो महासत्त्वो महामतः । (महामनः , महामनाः)
महौषधोर्महासिद्धिर्मरीचिर्महिमामयः ॥ ७॥

मङ्गलो मङ्गल्यो मायी मुण्डमाली मनोजवः । (मङ्गल्यो मङ्गलो मायी)
महापट्टर्महात्यागी महाकाशा महाबलः ॥ ८॥ (महाकोशो)

महासनो महाकल्यो महागर्भो महाधनुः । (महाकालो)
महेष्वाशो महोभर्ता महावीरो महाभुजः ॥ ९॥

मेखलो मधुरो मुण्डो मखकर्ता मखायहा । (मेखली)
मातामहो मातरिश्वा मधुरो मधुरप्रियः ॥ १०॥

महोत्सवो महानेता मन्युमत्तो महोव्यमः ?? । (महाव्योमः , महाव्ययः)
महोत्साहो महावर्तो मल्यो मलनाशनः ॥ ११॥ (मलयो)

मातृप्रियो मातृवर्ती मातुरो मरूतां पिता ।
मरुत्सखो मारिरिपुर्मारङ्गोमारभञ्जनः ॥ १२॥

मधुहा मधुमृन्मध्यो मेध्यासी मखकृन्यतः । (मधुमृन्मेध्यो)
यमो यामो यमपतिर्यज्ञो यज्ञविवर्धनः ॥ १३॥

योगी यज्ञेश्वरो यज्वा यक्षेशो योगिनीपतिः ।
यायावरो  यदुर्युक्तिकृत्युक्तिसाधनः ॥ १४॥

यति यतिप्रियो युग्मो युगपद्यामिनीप्रियः ।
यज्ञभुक्यज्ञकृद्यज्ञो यदुनाथो यशप्रदः ॥ १५॥

योगाङ्गो योग सारङ्गो योग्यो यक्षपतिर्पति ।
योगाचार्यो योगगम्यो युग्मो युग्मचरो यशः ॥ १६॥

रुद्रो रत्नेश्वरो रौद्रो रोग रोगेश्वरो रुचिः ।
रम्यो रणप्रियो रुष्टो रोषहा रोषवर्धनः ॥ १७॥

रणश्रेष्ठो रथो रामो राटुरात्रिचरो रुचिः ।
रोगहा रोगकृद्रोगी रम्यो रस्यो रसप्रियः ॥ १८॥

रयो राजेश्वरो राजा राजराजो रामेश्वरः ।
रश्मिमाली रुचिधरो रोचनो रसदो रसी ॥ १९॥

रसप्रियो रसावासो राजीवनयनो रघुः ।
रक्षघ्नो राक्षसाहारो रुधिरौघ प्रियोरथः ॥ २०॥

रचिरो रुचिरावासो रुचिकृद्रुचिराङ्गदो ।
लम्बो लघुलोहिताक्षो लीलाब्धि ललितासखः ॥ २१॥

ललाटाक्षो लोककन्दो ?? लक्ष्मीर्लक्ष्मीपतिर्लताः ?? ।
लीलाविलासो लोलाङ्गो लोलाक्षो लोकवर्द्धनः ॥ २२॥ (लीलाविलासी लोलाङ्गे)

लोकबन्धु लोकनाथो लक्ष्मणो लक्ष्मणप्रियः ।
लोकमायी लोलजिह्वो ललितो लोललक्षणः ॥ २३॥

लावण्य ललितो लास्यप्रियो लीलाविभूषणः ।
लुब्धो लम्बोदरो लोक्यो लोकस्वामी लसन्यतिः ?? ॥ २४॥

वैद्यो वरीयान्वरदो विद्वान्विद्याविशारदः ।
विश्वामरेश्वरो विश्ववेद्यो वेदवपुर्विभुः ॥ २५॥ (विश्ववन्द्यो)

विश्वनाथो विश्वमूर्तिर्विश्वकृद्विश्ववर्धनः ।
विश्वाधारो विश्वगम्यो विश्वभुग्विश्वसाधनः ॥ २६॥

विरूपाक्षो विश्वरूपो वागीशो वृषभध्वजः ।
वेदान्तवेद्यो विद्येशो वेदाङ्गो वेदविद्विभुः ॥ २७॥

विबुधो विजयो वर्णी वर्णाश्रमगुरुर्वसुः ।
विश्वकर्मा वसुमनाः व्यालभृद्विद्रुमच्छविः ॥ २८॥

विशिष्टो विजयोवादी विश्वकर्मा वृषाकपिः ।
वेद्य वैद्यो वेदवपुः वामदेवो विमोचकः ॥ २९॥

विश्वाख्यो विश्वश्रग्व्यासो विजितात्मा व्यपोवसी ?? । (व्याप्योवासी ??)
वीरभद्रो वीरसेनो वीरासन विधिविधः ॥ ३०॥

व्यवसायो व्यवस्थानो वीरचूडामणिविराट् ।
विश्वदेहो बाली बल्यो विरामो वसुदोवरः ॥ ३१॥

विद्वत्तमो वररुचिर्वैद्धो वाचस्पतिर्वपुः ।
विरोचनो वीतभयो विशुद्धो विमलोदयः ॥ ३२॥

वैवस्वतो विश्वगोप्ता विभूतिर्विगतज्वरः ।
वशिष्ठो विश्वहा विश्वो विश्वकर्ता वसुपति ॥ ३३॥

विश्वामित्रो विश्वसाहो वीरोत्पत्तिर्विदारणः ।
विश्वावासो वज्रहस्तो वज्ररूपी वसुश्रवाः ॥ ३४॥ (वज्ररूपो)

विरूपो विकृतो वेगी विपाको विश्वकारकः ।
वीरोत्पत्तिर्वरसखो व्यक्ता व्यक्तो विशाम्पतिः ॥ ३५॥

विरूपो विकृतो वाग्मी विरञ्चिर्विष्टरश्रवाः ।
विचक्षणो विश्वगर्भो विदुधाग्रकरो (??) विराट् ॥ ३६॥ ( विधुदिनकरो ?? )

विचक्षणो विलोमाक्षो विरूपाक्षो वृकोदरः ।

वसन्तो वित्तदो वित्तवृषदो विक्रमोत्तमः ॥ ३७॥

वृषदो विक्रमो वेद्यो वैद्यो विश्वविभूषणः । (वेद्यो वेद्यो)
विषमस्थो विविक्तस्थो विविक्तो विश्वभावनः ॥ ३८॥ (विविक्तेस्थो)

विद्याराशिवशिष्ठज्ञो ?? विश्वनाथो विपात्क्रियः (??) । (विपात्क्रियः ??)
शृङ्गी सर्वशिवः शम्भुः श्रीकण्ठः श्रीनिधिः शमः ॥ ३९॥

शमनः शोभनः शूली शूलशान्तः शिवशङ्करः ।
शङ्करः शोभनः शुद्धः शुद्धाख्यः शुद्धविग्रहः ॥ ४०॥

शाखः शङ्खः शनिः श्रीदः श्रीगर्भः शरणप्रियः ।
श्रन्यः (??) शरण्यः शान्तात्मा श्रुतिगीः श्रुतिवत्सलः ॥ ४१॥ (श्रव्यः)

श्रुतिप्रियः श्रुतिगतिः श्रुतिज्ञः श्रुतिमान्श्रुतः ।
षङ्ग षड्गुणः षष्ठः षडङ्गः षणमुखवल्लभः ॥ ४२॥

(षडङ्गः षड्गुणः षष्ठः षङ्ग षणमुखवल्लभः)
सहस्रार्चिः सप्तजिह्वः सहस्राक्षः सहस्रपात् ।
सामवेदः सोमरतः सामवृतः सनातनः ॥ ४३॥

सदाशिवः सनात्सर्वः सम्भाष्यः स्वाश्रमः सहः ।
सुवर्णः सर्वलोकेशः सूर्य सर्वेश्वरः सुहृत् ॥ ४४॥

स्वस्तिभुक् सुग्रहः स्वस्तिः स्वस्तिकः स्वतिभूः सुधीः ।
सम्भाव्यः सम्भवः सत्त्वः सत्यज्ञः सत्यसङ्गरः ॥ ४५॥

सर्वावासः सुराधीशः सन्तोषः सम्प्रतः सहः ।
सर्वादिसिद्धिदः सिद्धः सुवीरः सर्वलोकधृक् ॥ ४६॥

संसारचक्रकृत्सारः संसारः सर्वसाधनः ।
सुशरण्यः सुरगणः सुब्रह्मण्यः सुधानिधिः ॥ ४७॥

संराट् सुखेन (सुषेण) सर्वांशो स्वाधिष्ठानं सताङ्गतिः । (सर्वांशी)
संवत्सरः सर्वहारी सङ्ग्रामः सागरप्रियः ॥ ४८॥

समर्थः सर्वदिक्स्वस्थः सर्वावासः सुरारिहा ।
सुवृद्धात्मा सुप्रतीकः समृष्टः सप्ततिः समः ॥ ४९॥

सद्योगी सुगतः स्रग्वी सारथिः सदसन्मयः ।
सर्वदेवमयः सोमः सर्वशास्त्रप्रभञ्जनः ॥ ५०॥

सुखानिलः सुप्रपन्नः सहस्रसुखनाशिकः ?? ।
सर्वदेवोत्तमः सेतुः सर्वभूतमहेश्वरः ॥ ५१॥

सकुमारः सुराध्यक्षः सुराभीष्टः सुलोचनः ।
सामगानप्रियः सामः सामगः सत्यसङ्गरः ॥ ५२॥

सर्वावासः सुतस्रष्टा सत्यव्रत परायणः ।
स्वर्गतः सकलः स्वर्गः सर्वस्वनमयः स्वनः ॥ ५३॥

सर्वाधारः सुराहारः सुरातृप्तः सुरामयः ।
सुराधारः सुरपूज्यः सुरहेतुः सुराकरः ॥ ५४॥

सदानन्दः सुप्रकाशः सरसः सारसप्रियः ?? ।
स्तोत्रं स्तवप्रिय स्तोतः सुनिष्ठः सुरतप्रियः ॥ ५५॥

सुरतासन सन्तुष्टः सुरताधारतत्परः ।
सुरतप्रवणः सूर्यः सूर्यमण्डलमध्यगः ॥ ५६॥

साधुः साधुप्रियः साध्वीपतिः साधनसाधितः ।
सम्भूतिः सागरगतिः साङ्गः सन्तानदः सखः ॥ ५७॥

सायकः सङ्गीतकरः समरः समरप्रियः ।
सप्तजिह्वः सहस्रार्ची सप्तार्चिः सप्तवाहनः ॥ ५८॥

सात्विकः सर्वजित्सत्यः सर्वसंसार सारथिः ।
सप्ताचलमुनीशानः सृष्टि स्रष्टा स्तवप्रियः ॥ ५९॥

स्थूल सूक्ष्मः सदादृष्टी सहस्रार्कप्रकाशकः ।
सहस्रदंष्ट्रः सन्धाता सारमेयानुगः स्वभूः ॥ ६०॥

संवृतः संवृत्तः सौरिः सदातुष्टः सदोद्धतः ।
हर्षणो ह्वेषणो हर्षी हरो हंसो हरिप्रियः ॥ ६१॥

हयमांसप्रियो हृष्टो हृषीकेशो हयाकृतिः ।
हेतुप्रियो हेतुगम्यो हेतुर्हेमप्रियोहविः ॥ ६२॥

हलाहलधरो हारी हनूमान् हाटकेश्वरः ।
हठी हठप्रियो हुण्डो हुण्डमांसाशनप्रियः ॥ ६३॥

हालापानरतो हन्ता हस्तिमांसासनो हुतः ।

ह्रेषो ह्रेषणकृद्धस्ती हन्ता हस्तिपको हली ॥ ६४॥ (ह्रेषी)

ह्रीं पतिः ह्रीं निधिः ह्रीं शो ह्रीं सखो ह्रीं निषेवितः । (ह्रीं ईशो)
(ह्री पतिः ह्री निधिः ह्री शोः ह्री सर्वो ह्री निषेवितः)
ह्रौङ्कार क्षत्रयः क्षत्री क्षेत्रज्ञः क्षेत्रदः क्षमी ॥ ६५॥ (क्षत्रपः क्षत्रीः)

क्षोणाधारः क्षेमनाथः क्षयः क्षोणोधराश्रयः । (क्षोणीधराश्रयः)
क्षपानाथधरः क्षत्ता क्षणदेशः क्षपाकरः ॥ ६६॥

क्षत्रियः क्षत्रियाधीशः क्षमाः क्षैमः क्षयङ्करः ।
क्षत्रियः क्षजतोहारः क्षयकृत्क्षयवल्लभः ॥ ६७॥

अनन्तोऽनन्तगमनोऽनन्ताक्षोऽनन्तशासनः ।
अनादिरतुलोचिन्त्यो अव्ययोव्ययवर्जितः ॥ ६८॥

अवधूतोवटस्थानी अनन्त्योद्भुत्विक्रमः ।
आनन्द आत्मवानाद्य आदित्याद्येश्वरेश्वरः ॥ ६९॥

अनेकरूपोऽनन्तश्रीरादिदेवोरमेश्वरः ।
अर्यप्रियोऽक्षयोऽक्षीणः आसावाधार आदिमः ॥ ७०॥

ईश्वरो वसुरीशानः इन्दुरिन्द्रः इलापतिः ।
उग्र ?? उग्रा ?? उग्र ?? उच्च ?? उच्च ?? उच्चश्श्रवाः उदक् ?? ॥ ७१॥

ऊर्ध्वपादुत्तमगतिः ऊर्ध्वगोर्ध्वगतिर्मतिः । (ऊर्ध्वगोर्ध्वगतिर्गतिः)
उद्यानवासीसुरसः करोरुर्द्धजनप्रियः ॥ ७२॥

कुलप्रियः कुलधरः कुलाधारः कुलेश्वरः ।
कुलाचारकरः कार्य कुलाचार प्रवर्तकः ॥ ७३॥

कौलवतधरः कूर्मः कामी केलिप्रियः क्रतुः ।
कलाधरः कण्ठकालः कूटस्थः कोटराश्रयः ॥ ७४॥

करुणः करुणावासः करुणामृतवारिधिः ।
कृती कृतज्ञः कृत्यावान्कौतुकी कालिकापतिः ॥ ७५॥

करिचर्मधरः कर्मी कारुणं करुणाकरः ।
कृष्णः कृष्णप्रियः कृष्णाराध्यः कृष्णकुलान्तकः ॥ ७६॥

कूटस्थः कूटकावासः कर्मठः कर्मठप्रियः ।
कठिनः कोमलः कर्णकण्ठवासः कुलेश्वरः ॥ ७७॥

करालमाली कालज्ञः कृतकौतुकमङ्गलः ।
कन्याकुलपतिः कन्यानाथः कन्याकुलाश्रयः ॥ ७८॥

खड्गी खड्गधरो खञ्ज खमतिः खगतिः खगः ।
खलन्वः खलयः ख्यातः ख्यातिमान् खेचरीप्रियः ॥ ७९॥

गगो गौरीपतिर्गीतः गोत्रेशो गौतमप्रियः । ( गगौ ?? )
गणो गणेश्वरो गण्यो गुणी ज्ञानप्रियो गतिः ॥ ८०॥ ( गणौ ?? )

गानगम्यो गदी गौरो गिरीशो गौरवेश्वरः । (गदो, गदौ)
गालवोगर्तसदनो गन्धर्वो गन्धवल्लभः ॥ ८१॥

गन्धर्वाधिपतिर्गेयो गीष्पतिर्गरुडध्वजः ।
गोपतिर्गोसवो गोप्ता गायत्री गणतत्परः ॥ ८२॥

गोप्रचारो गणधरो गणेशो गणवल्लभः ।
गद्यप्रियो गद्यगम्यो गुरुगम्यो गुरोदरः ॥ ८३॥

गूढकर्मा गूढधर्मा  गुप्तो गुप्तमतप्रियः ।
गङ्गाधरो गवाङ्गोप्ता गोसवो गोरसेश्वरः ॥ ८४॥

घण्टानादप्रियधर्मा घण्टायनिर्घटोदरः ।
घटाधारो घटावासो घनदाघ्येनगर्जितः ॥ ८५॥

अङ्गदो गन्धर्वो गो गीः पिङ्गाक्षः शृङ्खलाधरः । (पिङ्गलाक्षः)
चण्डो चण्डीप्रियश्चित्तश्चौरश्चोरपतीश्वरः ॥ ८६॥

चारुवेगश्चारुगतिश्चार्यगश्चारुभूषणः । (चारुवेगश्चारुगतिः चायङ्गश्चारुभूषणः)
चर्मवसश्चन्द्रचूड चिन्ताघ्नश्चिन्तितप्रदः ॥ ८७॥

चिन्तामणिश्चित्रगतिश्चिरायुश्चण्डिकासखः ।
चितावासश्छिन्नरूपश्छलज्ञश्छलनिग्रहः ॥ ८८॥

छादनश्छदनश्छन्दश्छन्दचारी छलप्रियः । (छादनश्छन्दनश्छन्दः छन्दचारी)
छागमांसप्रियश्छागश्छिन्नारिश्छिन्नबन्धनः ॥ ८९॥

छेदश्छेदकरश्छेदी छेद्मेशश्छद्मवल्लभः । (छेदश्छेदकरश्छेको छेद्मेशश्चछद्यवल्लभः)
छादनश्छदनश्छन्दश्छन्दोवृत्तिविशारदः ॥ ९०॥ (छादनश्छद्मनश्छद्यः छन्दोवृत्तिविशारदः)

जयाजयन्तो जयकृज्जयदो जयवर्द्धनः ।
जयासखो जयप्रेप्सुर्जितकाशी जितेन्द्रियः ॥ ९१॥ (जयप्रेप्सुः जितकाशी)

जृम्भारि जृम्भनो जृम्भी जीवातुर जीवनप्रदः ।
जलधिर्जलधोजानो जितोजीनो जगत्पतिः ॥ ९२॥

जातुकर्णो जटाधारी जन्ममृत्यु जरातिगाः ।
ज्यायान्जिष्णुर्जितिरातिः जीवाजीवो जलोदरः ॥ ९३॥

जोषी जायप्रदो जोषो जोषजो जोषवर्धनः ।
गात्करो गर्गो गङ्गः टङ्कारष्टङ्करष्टङ्कः ॥ ९४॥

टीकौ टीकाकरष्ठायी ?? ठसरूपो ?? ठयाश्रयः ??।
डिमप्रियो डाकिनीशो डामरो डमरूप्रियः ॥ ९५॥

ढुण्ढिः ढैकनकृतढङ्क ?? ढारोसुण्डोण्डजाशानः ?? ।
तरुणस्तरुणीनाथः तीर्थस्तीर्थाश्रयोमयान् ॥ ९६॥

तीर्थज्ञः तीर्थकृत्तीर्थो तीर्थदस्तीर्थवल्लभः ।
तीर्थतृप्तिः तीर्थहृष्यः तमोनाशस्तमाश्रयः ॥ ९७॥

तोयदस्तपनस्तायी तृप्तास्तीरासनप्रियः ।
तारस्तेजोनिधि स्तोत्रस्तोमरस्तोमरायुधः ॥ ९८॥

तीर्थगण्डीददोहस्त ?? दुर्धरोदारुणाकृतिः । (हस्त )
दुर्गो दुर्गप्रियो दीप्तो दुर्गहा दुर्ग रक्षकः ॥ ९९॥

देवदेवो देवपूज्यो देवेन्द्रो दूरदर्शनः ।
दोषज्ञो दोषदो दीनप्रियो दण्डीश्वरो दमः ॥ १००॥

दयालुर्दम्भदमनो देवपूज्यो दमव्रतः ।
धर्मप्रियो धनाध्यक्षो धनदो धान्यभृद्धनी ॥ १०१॥

धीरो धीराधारो धाराधरो धेयो धुरन्दरः ।
धृति धैर्यध्वजी धाता नयो नेता नमस्कृतः ॥ १०२॥

नारायणसुखो न्यासो नीतिमान्नीतिवर्धनः ।
नृसिंहदर्पदमनो निर्द्वन्द्वो निरुपद्रवः ॥ १०३॥

नागरूपो नागधरो नरो नरकजिन्नृपः ।
नारीसखो नादगम्यो नादो नादविवर्धनः ॥ १०४॥

नायको नारदो नप्ता नैर्नेष्टा नाट्यनायकः ।
नदीशयो नदीनाथो नन्दनो नन्दिवल्लभः ॥ १०५॥

नर्मदावाससन्तृप्तो नर्मज्ञो नूतनो नवः ।
पदः पातालनिलयः पूरण प्रेतवाहनः ॥ १०६॥

प्रेतासनगतः प्रेतः प्रेतभुक्पवनाशनः ?? । प्रेतभृत्वनाशनः
पीठ्सर्पो ?? पीठगतिः ?? पण्डितः पल्लवायणः ?? ॥ १०७॥

पुराणः पुण्यगमनः पुण्यवास परायणः ।
पददातौ परमप्रीतः प्रयोक्ता प्रणवः प्रभुः ॥ १०८॥

प्रत्ययः पानपः पाता पुरुषः पुरुषेश्वरः ।
पर्जन्यः पार्वतीनाथः पशुनाथः प्रजापतिः ॥ १०९॥

फेत्कारः फेरवीनाथः फूत्कारः फलदः फलः ।
फेनपः फणिभृद्धेतु बटुर्बालो बलाश्रयः ॥ ११०॥

ब्रह्माण्डभेदनो ब्रह्मा ब्रह्मभूर्ब्रह्मवर्धनः ।
ब्रह्मण्यो ब्रह्मणो ब्रह्मो ब्रह्मभूर्ब्रह्मासुरारि ॥ १११॥

बन्धघ्नो बन्धहा बीजं बहुकृद्युग्बाहुबलीः ?? । (बहुकृद्युग बाहुबलीः ??)
विप्रप्रियो विप्रसखो विप्रेशो वित्तयो वसुः ॥ ११२॥

भगो भर्गो भृगुर्भङ्गी भव्यो भीमो भयङ्करः ।
भङ्गास्वादो भूतनाथो भालाक्षो भूतिभूषणः ॥ ११३॥

भद्रेश्वरो भद्रगतिर्भानुर्भद्रध्वजो भवः ।
भगप्रियो भगवासो भगभूर्भगयोषणः ?? ॥ ११४॥

फलश्रुतिः -
इति नाम्ना दशशतं महाकालस्य सद्मनम् ।
पुत्रारोग्यधनं प्रीतिप्रदं विजयवर्धनम् ॥ ११५॥

सर्वदुष्टप्रशमनं सर्वव्याधिविनाशनम् ।
एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः ॥ ११६॥

यः पठेन्नियतः शुद्धः सर्वान्कामानवाप्नुयात् ।
पूजान्ते चापिहोमान्ते जयान्ते च पठेदिदम् ॥ ११७॥

पुरश्चरणमेतस्य शतावृतिरिहोच्यते ।
महाकाल समोभूत्वा योजयेन्निशि निर्भयः ॥ ११८॥

यशः कामानवाप्नोति मानसान्नात्र संशयः ।
निशायां भूमिकामश्वषण्मांसान्यो जपेत्सुधीः ॥ ११९॥

प्रतिकृत्या विनाशाय जपेदेतत्क्षण त्रयम् ।
मासत्रयं जपत्रित्य निशि निश्चलधीः स्वयम् ॥ १२०॥

पुत्रान्धन तथा दारान्प्राप्नोत्यत्र न संशयः ।
कारागृहहेतु निगडेर्बद्धः कर्पाटभिद्दढः ॥ १२१॥

पठेन्निदं दिवंरात्रं सर्वान्कामानवाप्नुयात् ।
यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥ १२२॥

॥ इति श्री शैवागमकल्पे महाकालसहस्रनामस्तोत्रं सम्पूर्णम् ॥

The stotram has been encoded from a publication (referenced as Scan) that seems to have errors at source. There are several names/words which are doubtful and have been marked with '??'. Scholars who go through this text are requested to send corrections to sanskrit@cheerful.com.

The stated source text "shaivAgamakalpa" could not be traced.

The variations given are collated from the available source-print and the audio-video. Readers are advised to use due discretion.

Proofread by Ruma Dewan

*Shri Mahakalabhairava Sahasranama Stotram*

pdf was typeset on May 23, 2023

Please send corrections to *sanskrit@cheerful.com*